दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लैकादशी
माघ 16 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-98 | 1 | जनवरी 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले महत्-हिमपातेन जनजीवनं अस्तव्यस्तं, ३२०० तः अधिकाः विद्युत्-परिवर्तकाः बाधिताः

4 महर्षि महेश योगी वैदिकविश्वविद्यालये धर्मगुरु-जीविका-परामर्शः

6 भारतीयस्वतंत्रतान्दोलने नेताजीसुभाषचन्द्रबोसस्य योगदानम्

# राष्ट्रपतिपदासीना द्रौपदी मुर्मुः संसदः संयुक्तसम्मेलनम् अभिसंबोधितवती



**हिमसंस्कृतवार्ता:** - राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अकथयत् यत् सर्वकारः यथार्थतया सामाजिक-न्यायाय पूर्णतया प्रतिबद्धः अस्ति, फलतः गतदशके पञ्चविंशति-कोटिजनाः निर्धनरेखाम् अतिक्रमितवन्तः। आयव्यय-सङ्कल्पन-सत्रस्य प्रथमदिने संसदः उभयसदनयोः संयुक्तसम्मेलनम् अभिसंबोधयन्ती राष्ट्रपतिः मुर्मुः अवदत् यत् सर्वकारस्य तृतीये कार्यकाले निर्धनानां सशक्तीकरणस्य अभियानं महत्तरगत्या प्रावर्ततेति। राष्ट्रपतिः मुर्मुः अवदत् यत्, चतुर्दशोत्तरद्विसहस्र-तमवर्षस्य आरम्भे सामाजिकसुरक्षायाः योजनाः केवलं पञ्चविंशति-कोटिजनान् एव प्राप्तुम् अशक्नोत्। सा अवोचत् यत्, सर्वकारस्य निरन्तरप्रयासेण अद्य प्रायः पञ्चनवति-कोटिषु भारतीयेषु सामाजिकसुरक्षाव्यवस्था अस्ति। राष्ट्रपतिः अवदत् यत्, "सबका साथ, सबका विकास" इति परिकल्पना देशस्य सर्वनागरिकाणां जीवनं सकारात्मकरूपेण परिवर्तयति । आपरेशन् सिन्दूर इत्यभियानस्य समये भारतीय-रक्षासेनानां शौर्यस्य पराक्रमस्य च प्रशंसां कुर्वन्ती सा उक्तवती यत्, देशः स्वसम्पदायाः उपयोगेन आततायिनां आधारशिबिराणि नाशयत्। सा अवोचत् यत् सर्वकारेण दृढः सन्देशः प्रेषितोऽस्ति यत् भारतस्य उपरि कस्यापि आततायिनः आक्रमणस्य दृढः निर्णायकश्च प्रतिकारः भविष्यतीति। सा अवोचत् यत्, आपरेशन् सिन्दूर इत्यस्य अनन्तरं, मेड्-इन्-इण्डिया इत्यस्योपरि रक्षा-मञ्चेषु विश्वासः प्रबलः अभवत् । राष्ट्रपतिः अवदत् यत् सर्वकारस्य नीतिम् अनुसृत्य सुरक्षासैनिकाः अपि माओवादी-भयोत्पादनस्य विरुद्धं निर्णायकरूपेण कार्यम् अकुर्वन्। सा अवोचत् यत्, वर्षेभ्यः देशस्य सपादशताधिकेषु मण्डलेषु असुरक्षायाः, भयस्य, अविश्वासस्य च वातावरणम् आसीत्। सा अवोचत् यत् ग्राम्यक्षेत्रेषु वृत्यवसराणां विकासस्य च कृते विकसितभारत जी राम जी इति नामिका योजना अधिनियमितास्ति । राष्ट्रपतिः मुर्मुः अवदत् यत् इयं योजना ग्रामीणविकासाय नूतनां गतिं ददाति, कृषकाणां, पशुपालकानां, मत्स्यपालकानां च कृते नूतनाः सुविधाः च कल्पयति । सा अवदत् यत्, गत दशैकादश वर्षेषु, भारतं प्रत्येकस्मिन् क्षेत्रे स्वस्य आधारं सुदृढम् अकरोत् तथा च वर्षोऽयं विकसित-भारतं प्रति यात्रायाः प्रमुखः आधारः अस्ति।

## राष्ट्रपतेः द्रौपदी मुर्मू वर्यायाः संसदः उभयोः सदनयोः संयुक्तसभायाम् अभिभाषणम् अद्यतनीयस्य भारतस्य उल्लेखनीयविकासयात्रां प्रतिबिम्बयति- प्रधानमन्त्री



**हिमसंस्कृतवार्ता:** - प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् राष्ट्रपतेः द्रौपदी मुर्मू वर्यायाः संसदः उभयोः सदनयोः संयुक्तसभायाम् अभिभाषणम् अद्यतनीयस्य भारतस्य उल्लेखनीयविकासयात्रां प्रतिबिम्बयति । प्रधानमन्त्री अवदत् यत्, सम्बोधनं विकसितभारतस्य निर्माणस्य महत्त्वे केन्द्रितम् आसीत्। सम्बोधनमिदं सुदृढस्य आत्मनिर्भरस्य च राष्ट्रस्य निर्माणेन सह देशस्य संयुक्ताकांक्षामपि प्रतिबिम्बयति। तेनोदीरितं यत् कृषकाणां, यूनां, निर्धनानां, वञ्चितानां च कृते सतत प्रयासाणां प्रकाशनेन सह अस्मिन् भाषणे विविधाः विषयाः अपि निहिताः आसन् ।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना आभासीय-माध्यमेन सम्बोधितः

प्रधानमन्त्रिणा नरेन्द्रमोदिना केरलस्य आर्यवैद्यशाला-चैरिटेबल इति चिकित्सालयस्य शतवार्षिक-समारोहः आभासीय-माध्यमेन सम्बोधितः। भारत-यूरोपीय-व्यापारसमन्वयं ऐतिहासिकम् इति वर्णयन् श्रीमोदी अवदत् यत् एतत् व्यापारसमन्वयं भारतीय परम्परागत-वैद्यकीय-सेवानां चिकित्सकानां च प्रोत्साहनं करिष्यतीति ।

## नवदिल्ल्याः विजयचौक इत्यत्र भविष्यति बीटिंगरिट्रीट समारोहः

सप्त-सप्तति-तमस्य गणतन्त्रदिवसस्य समापनरूपेण बीटिंग रिट्रीट-इति सैन्यप्रत्यावर्तन-समारोहः अद्य नवदिल्ल्याः विजयचौक इत्यत्र भविष्यति। अत्रावसरे राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णनः, प्रधानमन्त्री नरेन्द्रमोदी अन्ये च केन्द्रीयमन्त्रिणः उपस्थिताः भविष्यन्ति ।

# महाराष्ट्रस्य उपमुख्यमन्त्री अजीतपवारः बारामतीनगरे विमानदुर्घटनायां दिवंगतः

**हिमसंस्कृतवार्ता।** महाराष्ट्रस्य उपमुख्यमन्त्री तथा एन. सी. पी. इति दलप्रमुखः अजीतपवारः बारामतीनगरे विमानदुर्घटनायां दिवंगतः। नागरिक विमानन मन्त्रालयेन सूचितं यत् वी. एस्. आर्. वेन्चर्स प्राईवेट लिमिटेड् इत्यनेन सञ्चालितं लियर्-जेट् 45 (वी. टी. एस्. एस्. के.) विमानम् अद्य प्रातः बारामती-विमानस्थानके पतितम्। महाराष्ट्रस्य उपमुख्यमन्त्रिणा सह द्वौ कर्मचारिणौ, द्वौ चालकदलसदस्यौ च आसन् इति मन्त्रालयेन सूचितम्। अत्रान्तरे, विमान दुर्घटना-अन्वेषण विभागः (ए. ए. आई. बी.) बारामती-विमानस्थानक विमानदुर्घटनायाः अन्वेषणं करिष्यति। राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री, लोकसभाध्यक्षः, अमितशाहः, राजनाथसिंहः, अश्विनी वैष्णवः इत्यादयः अनेके केन्द्रीयमन्त्रिणः महाराष्ट्रस्य उपमुख्यमन्त्रिणः निधने गभीरं दुःखं प्रकटितवन्तः। एन. सी. पी. प्रमुखस्य मृत्योः विषये राजनैतिक-क्षेत्रे अपि शोकः प्रसृतः अस्ति। महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फड्नविसः अवदत् यत्, उपमुख्यमन्त्री अजीतपवार-वर्यः जननेता आसीत् यः महाराष्ट्रस्य समस्यानां विषये गहनज्ञानं धारयति स्म, सामान्यजनानां मध्ये अपारविश्वासं च तस्मिन् आसीत्। तस्य मृत्योः अनन्तरं अद्य सम्पूर्ण राज्ये सर्वकारीय-अवकाशः घोषितः, दिनत्रयं यावत् राज्ये राजकीय-शोकः घोषितोऽस्ति

## सुभाषितम्

**एक चक्षुर्विवेको हि,**
**द्वितीयं सत्समागमः।**
**तौ नस्तौ यस्य स क्षिप्रं,**
**मोहकूपं पतेद्ध्रुवम्।**

भावार्थः- मनुष्य में विवेक (बुरे भले की पहचान) का होना उसकी एक आंख के समान है और सज्जन व्यक्तियों की संगति में रहना उसकी दूसरी आंख के समान है, जिस व्यक्ति में ये दोनों प्रवृत्तियां नहीं होतीं, वह व्यक्ति निश्चय ही एक अन्धे व्यक्ति के समान है और मोह रूप कुंए में गिर जाता है।




## भारत-अमेरिका-देशयोर्मध्ये रक्षा-सहभागित्वम् दृढम्



भारते अमेरिकादेशस्य राजदूतः सर्जियो गोर्, रक्षासचिवेन राजेशकुमारसिंहेन सह मिलित्वा, भारत-अमेरिका-देशयोर्मध्ये रक्षा-सहभागित्वम् दृढम् इति अवोचत्, तथा च गतवर्षे हस्ताक्षरितादशवर्षीय-रक्षा-सन्धिश्च सम्बन्धान् इतोऽपि गहनरं करिष्यतीति अवोचत्। सामाजिक-प्रसार माध्यमे सः अवदत् यत् गतवर्षे देशद्वयेन दश-वर्षीय-रक्षा-सन्धौ हस्ताक्षरं कृतम्, येन द्वयोः राष्ट्रयोर्मध्ये रक्षा-सहभागित्वम् महत्त्वपूर्णतया गहनं भविष्यति ।

# हिमाचले महत्-हिमपातेन जनजीवनं अस्तव्यस्तं, ३२०० तः अधिकाः विद्युत्- परिवर्तकाः बाधिताः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे मङ्गलवासररात्रौ जातेन प्रचण्ड-हिमपातेन अधोक्षेत्रेषु च वर्षया राज्यस्य बहुषु भागेषु यातायात- विद्युत्-जलापूर्तयः स्थगिताः अभवन्, येन जनजीवनं पूर्णतः अस्तव्यस्तं जातम्। हिमस्य सञ्चयेन घर्षणन्यूनतया (Slippage) च अनेके प्रमुखाः मार्गाः बद्धाः सन्ति। शिमला-रामपुर राष्ट्रियमार्गः कुफरी-फागू-नारकण्डा समीपे अवरुद्धः अस्ति। ठियोग-रोहड़ू मार्गः खड़ापत्थर क्षेत्रे, ठियोग-चौपाल मार्गश्च 'खिड़की' समीपे आवागमनाय पिहितः वर्तते।अधिकारिणां मते, केवलं शिमला-जनपदे एव ९३ सम्पर्कमार्गाः ६ प्रमुखाः मार्गाः च अवरुद्धाः सन्ति। सम्पूर्णराज्ये ३,२०० तः अधिकाः विद्युत्- परिवर्तकाः (Transformers) दोषपूर्णाः अभवन्, येषु १५०० तः अधिकाः विगत- षड्दिनेभ्यः बद्धाः सन्ति। चम्बा, कुल्लू, लाहौलस्पीतिः, ऊपरि-शिमला क्षेत्रस्य शताधिकेभ्यः ग्रामेभ्यः विद्युत्-आपूर्तिः विच्छिन्ना जाता। लाहौलस्पीति, किन्नौर, चम्बाजनपदस्य च पाङ्गी सदृशेषु उच्चक्षेत्रेषु जलभण्डारणकोषाः (Water tanks) हिमायिताः जाताः, येन गृह- जलपूर्तिः पूर्णतः बाधिता अस्ति। हिमपातानन्तरं तापमाने तीव्रगत्या ह्रासः जातः। ऊनानगरे तापमानं सामान्यात् ९ अंशाः न्यूनं (१२.८°C) अङ्कितम्। मण्डी, सुन्दरनगरं, सोलनं च अतीव शीतलानि सन्ति। शिमला-पुलिसदलेन जनेभ्यः स्खलनयुक्तेषु मार्गेषु, विशेषतः शिमला-चौपाल तथा शिमला-रोहड़ू मार्गेषु यात्रां न कर्तुं परामर्शः दत्तः। मनाली-क्षेत्रे मङ्गलवासररात्रौ एकं कारयानं हिमयुक्ते मार्गे ३६० डिग्री कोणेन भ्रमितं, परन्तु सुदैवेन कोऽपि हतः न जातः। जनजातीयक्षेत्रेषु केचन विद्यालयाः सुरक्षादृष्ट्या बद्धाः सन्ति। ऋतुविज्ञानविभागानुसारम् आगामि-दिनद्वयं यावत् राज्ये प्रचण्ड-शीतलहरी स्थास्यति।

## धर्मशाला-छात्रा-मृत्युप्रकरणम्-: अन्वेषणे जातिगत-आलोचनायाः 'रैगिंग' इत्यस्य च किमपि प्रमाणं न प्राप्तम्; यौनशोषणस्य कोणात् अन्वेषणं प्रचलति




हिमसंस्कृतवार्ताः- शिमला। धर्मशाला- राजकीयमहाविद्यालयस्य छात्रायाः संदिग्धमृत्युविषये उच्चशिक्षा- निदेशकः डॉ. अमरजीतकुमारशर्मा शिक्षासचिवाय राकेश कँवरमहोदाय विभागीय- अन्वेषण- प्रतिवेदनं (Inquiry Report) समर्पितवान्। अतिरिक्त- निदेशकस्य अध्यक्षतायां सङ्घटितेन अन्वेषणदलेन महाविद्यालयस्तरे जातिगत-टिप्पण्याः अथवा 'रैगिंग' इत्यस्य किमपि ठोस-प्रमाणं न प्राप्तम्। परन्तु यौनशोषणस्य कोणात् अद्यापि सूक्ष्म-अन्वेषणं प्रचलति। छात्रायाः चिकित्सा- प्रतिवेदनस्य (Medical Report), शवपरीक्षणस्य (Post-mortem) निष्कर्षानन्तरं अस्य पक्षस्य स्पष्टता भविष्यति।उच्चशिक्षा- निदेशालयेन प्रेषितेन पञ्चसदस्यीय- समित्या महाविद्यालये शिक्षकाणां, छात्राणां, प्रशासनिक- कर्मचारिणां च पृथक्-पृथक् साक्षात्काराः कृताः। समित्या उपस्थिति-पञ्जिका, आन्तरिक- उपालम्भ- तन्त्रं (Internal Complaint Committee) तथा पूर्वतन- उपालम्भानाम् अपि गहनतया निरीक्षणं कृतम्।

### समित्याः सङ्घटनम् आरोपिणः स्थितिः च

अतिरिक्त- निदेशकस्य डॉ. हरीशकुमारस्य अध्यक्षतायां सङ्घटितायां समित्यां ढलियारा- महाविद्यालयस्य प्राचार्या डॉ. अञ्जु आर. चौहान, बैजनाथस्य प्राचार्यः डॉ. प्रदीपकुमारकौण्डलः तथा च नौरा-महाविद्यालयस्य प्राचार्यः डॉ. राजेशकुमारः सदस्याः आसन्। शिक्षा-निदेशकः अवदत् यत् आरोपी 'असिस्टेंट प्रोफेसर' अशोककुमारः सम्प्रति निलम्बितः (Suspended) अस्ति, सः अनुमतिं विना शिमला-नगरात् बहिः गन्तुं न शक्नोति।

### किं वर्तते प्रकरणम्?

हिमाचलप्रदेशस्य धर्मशाला-स्थितस्य राजकीय-महाविद्यालयस्य एका १९ वर्षीया दलितछात्रा २६ दिसम्बर २०२५ दिनाङ्के लुधियानानगरे चिकित्सालयं प्रति नीता, यत्र उपचारकाले तस्याः मृत्युः अभवत्। मृत्योः पूर्वं सा दीर्घकालात् मानसिक-तनावग्रस्तता (Depression) आसीत्।

### परिजनानाम् आरोपाः-

परिजनानाम् आरोपाः सन्ति यत् १८ सितम्बर २०२५ दिनाङ्के तिस्रः वरिष्ठछात्राः तां ताडितवत्यः, धमक्यः च दत्तवत्यः। भूगोल-विभागस्य सहायक- आचार्यस्य उपरि अश्लील-चेष्टाणां, अशुद्धस्पर्शाणां च आरोपाः सन्ति। मृत्योः पूर्वं छात्रायाः एकं 'वीडियो' (Video) प्रसारितं जातं, यस्मिन् सा आचार्यस्य 'अजीब-चेष्टाणां' उत्पीडनस्य च व्यथां प्रकटितवती।

## "मनरेगा बचाओ संग्रामः राज्यसर्वकारः होराद्वयं यावत् उपवासं करिष्यति, काङ्ग्रेस-नेतारः रिज-मैदाने विरोध-प्रदर्शनं करिष्यन्ति।"

मनरेगा-योजनायाः महात्मागान्धिनः नाम निष्कासनस्य तथा च योजनायाः दुर्बलीकरणस्य विरोधे मुख्यमन्त्री-उपमुख्यमन्त्रिणा सह सम्पूर्णं मन्त्रिमण्डलं होराद्वयं यावत् उपवासं करिष्यति। अस्मिन् हिमाचल-काङ्ग्रेस-प्रभारी रजनी पाटिल अपि मुख्यरूपेण सम्मिलिता भविष्यति। जनवरी-मासस्य ३० दिनाङ्के शिमलास्थित-ऐतिहासिक-रिज-मैदाने महात्मागान्धिनः प्रतिमायाः सम्मुखं एषः उपवासः भविष्यति। अतः हिमाचल-काङ्ग्रेस-अध्यक्षेण सर्वेभ्यः मण्डलाध्यक्षेभ्यः, विधायकेभ्यः, पूर्वविधायकेभ्यः अन्येभ्यः च अस्मिन् कार्यक्रमे भागं ग्रहीतुं निर्देशाः निर्गताः। उल्लेखनीयं वर्तते यत् अखिलभारतीय-काङ्ग्रेस-समित्या मनरेगा-योजनातः महात्मागान्धिनः नाम निष्कासनस्य विरोधाय देशव्यापी 'मनरेगा बचाओ संग्राम' (मनरेगा-रक्षण-सङ्ग्रामः) आरब्धः। अस्य अन्तर्गतं हिमाचलप्रदेशे अपि काङ्ग्रेस-पक्षेण एकं अभियानं चालितम् अस्ति तथा च ग्रामस्तरे कार्यक्रमाणां आयोजनं क्रियते।

## सबरीमाला-स्वर्ण-ग्रहण-विवादस्य विषये विरोधः तीव्रः जायमानोऽस्ति



केरल-राज्ये सबरीमाला-स्वर्ण-ग्रहण-विवादस्य विषये विरोधः तीव्रः जायमानोऽस्ति, यत्र भाजपा-नेतृत्वे एन. डी. ए इति समूहः, काङ्ग्रेस नेतृत्वे यू. डी. एफ. इति समूहश्च सम्पूर्ण राज्ये पृथक् पृथक् आन्दोलनं कृतवन्तौ । केरलस्य काङ्ग्रेस् सांसदानां कार्यालयेषु, भाजपेति दलेन विरोधयात्रायाः घोषणा कृता, येन आरोपः कृतः यत् सी. पी. आई. (एम), काङ्ग्रेसश्च संयुक्तरुपेण अस्मिन् प्रकरणे संलग्नान् जनान् रक्षयन्तौ स्तः इति। अत्रान्तरे, काङ्ग्रेस् पक्षस्य द्वौ विधायकौ केरल-देवस्वोम्-इत्यस्य मन्त्रिणः त्यागपत्रस्य याचनां कृतवन्तौ विधानसभा-परिसराच्च बहिः गतवन्तौ।

## देहली- शिमला- धर्मशाला- उड्डयनानां सुचारुसञ्चालनाय राज्यसर्वकारः प्रतिवर्षं ३१ कोटिरूप्यकाणि दास्यति- मुख्यमंत्री

हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः। हिमाचलराज्ये विमानसेवानां विस्तारं कर्तुं तथा पर्यटनं प्रोत्साहयितुं राज्यसर्वकारेण देहली-शिमला, शिमला-धर्मशाला मार्गेषु नियमितविमानसेवानां सञ्चालनस्य निर्णयः स्वीकृतः। एतानि उड्डयनानि-सम्पूर्ण-सप्ताहं (सप्तदिनानि) प्रचलिष्यन्ति। अस्य सञ्चालनस्य निरन्तरतां सुनिश्चितं कर्तुं सर्वकारः प्रतिवर्षं ३१ कोटिरूप्यकाणि वित्तीयसहायतारूपेण प्रदास्यति। सर्वकारस्य प्रवक्ता अज्ञापयत् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुम होदयस्य नेतृत्वे वर्तमानसर्वकारः पर्यटनक्षेत्राय प्राथमिकतां यच्छति। पर्यटनं न केवलं राज्यस्य अर्थव्यवस्थां सुदृढां करोति, अपि तु युवकानां कृते जीविकायाः स्वजीविकायाः च नूतन-अवसरान् सृजति।

### विमानसेवायाः प्रमुखाः लाभाः

समयस्य रक्षणम्- नियमितविमानसेवाभिः यात्राकालः न्यूनः भविष्यति, येन पर्यटकानां व्यापारिणां च कृते सुगमता भविष्यति।आपात-कालीनसेवाः- एताः विश्वसनीयाः विमानसेवाः त्वरित-चिकित्सा- निष्कासने (MedicalEvacuation) तथा प्राकृतिक-आपदाकाले साहाय्यं कर्तुं महत्त्वपूर्णाः भविष्यन्ति। आर्थिकविकासः- नियमित-उड्डयनैः राज्यस्य समग्र-आर्थिकविकासे गतिः आगमिष्यति।

### चक्रविमानस्थानकस्य-निर्माणं नूतनाः सेवाश्च

राज्ये विद्यमानानां त्रयाणां विमानपत्तनानां (Airports) अतिरिक्तं प्रत्येकस्मिन् जनपदे 'हेलीपोर्ट' इति निर्माणं क्रियते।

### नूतनसेवाः-

सम्प्रति सञ्जोली- हेलीपोर्टतः चण्डीगढ-रिकाङ्गपिओ पर्यन्तं सेवाः आरब्धाः।

### आगामि-योजनाः-

शीघ्रमेव सञ्जोली- रामपुर- रिकाङ्गपिओ तथा सञ्जोली- मनाली (सासे हेलीपैड) मार्गेषु अपि हेलीकॉप्टरसेवाः आरप्स्यन्ते। एतदर्थं 'नागर विमानन महानिदेशालयं' (DGCA) प्रति प्रस्तावाः प्रेषिताः सन्ति।

# पञ्चायत-निर्वाचनम्- हिमाचले पञ्चायत- निर्वाचनस्य सिद्धता तीव्रा निर्वाचन-आयोगस्य निर्देशः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे पञ्चायत- नगरीय- निकाय- निर्वाचनानां कोलाहलः वर्धितः अस्ति। पञ्चायत- प्रतिनिधिनां कार्यकालः ३१ जनवरी दिनाङ्के समाप्तं भविष्यति। सम्प्रति निर्वाचन-आयोगेन पञ्चायत-निर्वाचनस्य सिद्धता तीव्रा कृता अस्ति। आयोगेन ३० जनवरी दिनाङ्के अन्तिम-मतदाता-सूच्याः प्रकाशनं कर्तुं उपायुक्तानां कृते निर्देशः दत्तः।प्रपत्र- १५, १७ एतौ प्रपत्रौ मण्डलकार्यालयेषु पञ्चायतभवनेषु च स्थापयितुं अनिवार्यं कृतम्।

## न्यायालयस्य आदेशः

हिमाचल-उच्चन्यायालयः राज्यसर्वकाराय ३० अप्रैल दिनाङ्कात् पूर्वं निर्वाचनं समापयितुम् आदेशं दत्तवान्।

## १ फरवरी तः प्रशासकानां नियुक्तिः

पञ्चायतानां कार्यकालसमाप्तेः अनन्तरं १ फरवरीतः प्रशासकाः दायित्वं सम्भालिष्यन्ति। पञ्चायतीराजविभागेन बीडीओ (BDO), डीपीओ (DPO) अथवा पञ्चायतसचिवानां प्रशासकरूपेण नियुक्तये प्रस्तावः प्रेषितः। प्रशासकानां नियुक्त्या सामान्यजनानां कष्टं वर्धयितुं शक्नोति। चरित्रप्रमाणपत्राणां, 'एनओसी' (NOC) पत्राणां, विकासकार्याणां च कृते जनानां प्रशासककार्यालयस्य पुनः पुनः भ्रमणम् आवश्यकं भविष्यति।

# दिल्ली- शिमला- धर्मशाला मार्गयोः उड्डयानां संचालनाय प्रतिवर्षं ३१ कोटिः रूप्यकाणि प्रदास्यन्ते- मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। **राज्ये हवाईसेवानां** दृढीकरणाय च पर्यटनस्य संवर्धनाय च राज्यसर्वकारेण निर्णयः कृतः यत् दिल्ली-शिमला, शिमला-धर्मशाला मार्गयोः नियमिताः हवाईसेवाः सञ्चालयन्ते। एते उड्डयानि सप्ताहे प्रतिप्रवर्त्यन्ते, तेषां सततसंचालनाय च राज्यसर्वकारेण प्रतिवर्षं ३१ कोटयोजनं वित्तीयसाहाय्यं प्रदास्यते।मुख्यमन्त्री सुखविन्दर्सिंहः सुक्खुः उक्तवान् यत् वर्तमानराज्यसर्वकारः पर्यटनक्षेत्रं प्राथमिकतया निरीक्षति, पर्यटकसुविधाः वृद्धयितुं च बहूनि प्रयत्नानि कृतानि। ते एव उक्तवन्तः यत् पर्यटनं राज्यस्य अर्थव्यवस्थायाः दृढीकरणे, युवजनस्य रोजगारस्य स्वरोजगस्य च सृजने महत्वपूर्णं भूमिका वहति। एतस्मात् उत्तमाः हवाईसेवाः पर्यटनं प्रोत्साहयन्ति, राज्यस्य समग्र- आर्थिकविकासे च साहाय्यं कुर्वन्ति। नियमितहवाईसेवानां सञ्चालनात् यात्रा समयः अपि लभ्यते तथा पर्यटकेभ्यः, व्यापकेभ्यः, सामान्यजनानां च सुगम आवागमनसाधनं सुनिश्चितं भवति। ते एव उक्तवन्तः यत् शिमला-धर्मशाला मार्गेषु विश्वसनीयहवाईसेवाभ्यः प्रशासनिककार्यप्रणाली च दृढीकरणं प्राप्नुयात्। हवाईसेवानां सततसञ्चालनम् पर्यटनवृद्धये दीर्घकालीन सामाजिक-आर्थिकविकासे च राज्यस्य प्रयासः रणनीतिकः सिद्धः भविष्यति। सब्सिडीआधारिताः क्षेत्रीयहवाईसंपर्काः दैनिकयात्रीभ्यः, व्यापारीभ्यः, पर्यटनाभ्यः च समानं लाभं यच्छन्ति।ते एव उक्तवन्तः यत् राज्ये त्रयः सञ्चालिताः हवाईअड्डयः सन्ति, अन्ये च बहवः हेलिपैड्स उपलब्धाः। प्रतिदेशमुख्यलयेभ्यः अन्येषु च प्रमुखेषु पर्यटनस्थलेषु हेलिपोर्ट्स निर्मिताः भवन्ति। हालमेव संजौलीहेलिपोर्टात् चण्डीगढं रिकांगपियो च हेलिकाप्टरसेवाः आरब्धाः, येन पर्यटकाः राज्यस्य प्रमुखेषु पर्यटनस्थलेषु सरलतया प्राप्यन्ते। तदुपरि संजौली- रामपुर- रिकांगपियो, संजौली- मनाली (सासे हेलिपैड) मार्गेषु शीघ्रमेव हेलिकाप्टरसेवाः आरब्धाः भविष्यन्ति। एतेषां हवाईमार्गाणां मानकसञ्चालनप्रक्रियायाः अनुमोदनाय नागरविमाननमहानिदेशालयं (DGCA) प्रस्तावः प्रेषितः।

# भरमौरस्य 'पुलन' पञ्चायते भीषण-हिमस्खलनम्; द्वे वाहने त्रीणि आपणानि च प्रभावितानि



**हिमसंस्कृतवार्ताः- चम्बा।** हिमाचलप्रदेशस्य चम्बाजनपदस्य भरमौरक्षेत्रे अर्धरात्रौ जातस्य भीषण-हिमस्खलनस्य (Avalanche) कारणेन महती क्षतिः जाता। अनेन लाहौल- स्पीति- जनपदस्य कश्चन विशालः भागः मार्ग-सम्पर्कात् पूर्णतः विच्छिन्नः जातः। प्राप्त-सूचनया ज्ञातं भवति यत् भरमौरस्य पुलन-पञ्चायते 'ऑट नाला' इत्यत्र मङ्गलवासररात्रौ एकः विशालः हिमनदः (Glacier) पतितः, येन आकस्मिकं हिमस्खलनं सञ्जातम्।अस्मिन् हिमस्खलने द्वे 'पिक-अप' वाहने प्रवह्य गभीरे गर्तक्षेत्रे पतिते, ययोः अद्यापि किमपि ज्ञानं न प्राप्तम्। अपि च, स्थानीयनिवासिन्याः घडलो देव्याः त्रीणि आपणानि (Shops) अपि ध्वस्तानि जातानि। पञ्चायत-प्रधाना अनीताकपूर घटनायाः पुष्टिं कृतवती। ग्रामिणानां मते विगत-पञ्चाशत्-वर्षेषु एषा भीषणतमा घटना अस्ति।

## लाहौल-स्पीति-जनपदस्य स्थिति-विवरणम्

पार्श्ववर्ति- जनपदस्य लाहौल-स्पीति इत्यस्य आपदा-प्रबन्धन- प्रतिवेदनानुसारं स्थितिः एवमस्ति-

**मार्गावरोधः-** लोकनिर्माणविभागस्य २७५ मार्गाः विविध- उपमण्डलेषु अवरुद्धाः सन्ति।

**राष्ट्रियमार्गाः-** ग्रांफूतः लोसर (NH-505) तथा दारचातः सरचू (NH-03) इति मार्गद्वयं २०२५ तः एव शीतकालीन-प्रतिबन्धेन पिहितं वर्तते।

## अवरुद्धाः प्रमुखाः मार्गाः-

कोकसर-रोहताङ्ग-पास, ग्रांफू-बातल मार्गाः पूर्णतः बद्धाः सन्ति।

सम्प्रति केवलं एटीआर (ATR) नॉर्थ पोर्टल तः दारचा पर्यन्तं तथा सुमदोतः लोसर पर्यन्तं मार्गाः अतीव संकटपूर्णस्थितौ उद्घाटिताः सन्ति। अत्र केवलं 'स्नो-चेन' (Snow-chain) युक्त-वाहनानां (4x4) कृते एव अनुमतिः दत्ता अस्ति। सुप्रदं वर्तते यत् लाहौल-स्पीति-क्षेत्रे जल- विद्युत्- आपूर्तौ किमपि विघ्नं न जातमस्ति।

# यूजीसी-नियमावली-संशोधनस्य विरोधः, कंठे रज्जु-पाशः धारयित्वा भाजपा-कार्यालयस्य आरोधः



**हिमसंस्कृतवार्ताः- शिमला।** विश्वविद्यालय-अनुदान- आयोगेन (यूजीसी) उच्च- शिक्षण- संस्थासु प्रवर्तितानां नवानां नियमानां देशव्यापी विरोधः क्रियते। अस्य एव क्रमस्य अन्तर्गतं बुधवासरे शिमलानगरे राष्ट्रीय- देवभूमि- पार्टी- अध्यक्षस्य रूमितसिंहठाकुरस्य नेतृत्वे चक्करस्थिते भाजपा-प्रदेशकार्यालयस्य आरोधः कृतः। अस्मिन् अवसरे राष्ट्रीय- देवभूमि- पार्टी, देवभूमि- क्षत्रिय- संगठन- सवर्णमोर्चा इत्येतयोः कार्यकर्तारः कण्ठे रज्जुपाशं धारयित्वा यूजीसी- नियमावली- संशोधनस्य तीव्रं विरोधं, सर्वकार- विरोधी उद्घोषैः प्रचण्डघोषश्च कृतवन्तः। केन्द्रसर्वकारात् एतेषां नियमानां प्रत्याहारः कर्तव्य इति आग्रहः अपि कृता। यदि आग्रहः न स्वीकृताः स्युः तर्हि उग्र- आन्दोलनस्य सतर्कतानिर्देशः अपि प्रदत्तः। नवानां नियमानां विरोधं शिक्षक-संगठनानि सामाजिक- संगठनानि च अपि कुर्वन्ति। यूजीसी द्वारा 13 जनवरीदिने "उच्चशिक्षायां समताविनियमाः, 2026" इति अधिसूचना प्रकाशिता आसीत्।

# ज्ञानसागरपब्लिक विद्यालयस्य मोतिहारी-नगरे २९तमः वार्षिकोत्सवः हर्षोल्लासेन सम्पन्नः



**हिमसंस्कृतवार्ताः- कुणाल कौशिक मोतिहारी।** मोतिहारीनगरे स्थितस्य प्रतिष्ठितस्य ज्ञानसागर पब्लिक विद्यालयस्य २९तमः वार्षिकोत्सवः अत्यन्तं हर्षोल्लासेन, गौरवेण च आयोजितः। अस्मिन् अवसरे विद्यालयपरिसरः सुशोभितः आसीत्, यत्र अभिभावकाः, शिक्षाविदः, गणमान्य- अतिथयः च समुपस्थिताः आसन्।कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन कृतः। अस्मिन् अवसरे विद्यालयस्य प्राचार्यः डॉ. धर्मेन्द्र मिश्रः, उपप्राचार्यः ओमप्रकाश सिंहः, मुख्यातिथिः केन्द्रीय-विश्वविद्यालय- मोतिहारी- स्थित- हिन्दी- विभागस्य प्राध्यापकः डॉ. श्यामनन्दनः, प्रसिद्धः होम्योपैथिक चिकित्सकः डॉ. राजेश श्रीवास्तवः, बारिया रंगकर्मी नाट्यव्यक्तित्वं प्रसाद रत्नेश्वरः संयुक्तरूपेण दीपं प्रज्वालयित्वा कार्यक्रमस्य विधिवत् उद्घाटनं कृतवन्तः।विद्यालयस्य प्राचार्यः डॉ. धर्मेन्द्रमिश्रः स्वीय-उद्बोधने विद्यालयस्य २९वर्षीयां शैक्षिकयात्रां विवृण्वन् अवदत् यत् ज्ञानसागर पब्लिक विद्यालयः केवलं शैक्षणिक-ज्ञानप्रदानं न, अपि तु संस्कारपूर्णां मूल्याधारितां शिक्षां प्रदातुं सततं प्रयत्नशीलः अस्ति। सः विद्यार्थिनां सर्वाङ्गीणविकासे सांस्कृतिक-कार्यक्रमाणां महत्त्वं अपि प्रतिपादितवान्।मुख्यातिथिः प्रो. डॉ. श्यामनन्दनः विद्यार्थिनः सम्बोधयन् अवदत् यत् भारतीय-संस्कृतिः, भाषा च लोकपरम्पराः अस्माकं अस्मिता भवन्ति, तासां संरक्षणं संवर्धनं च आवश्यकम् अस्ति। विद्यालयेन विद्यार्थिषु सांस्कृतिक-चेतनायाः जागरणार्थं कृतान् प्रयत्नान् सः प्रशंसितवान्।सांस्कृतिक-कार्यक्रमेषु विद्यालयस्य छात्रैः छात्राभिश्च देशभक्तिनृत्यानि प्रदर्शितानि, येन दर्शकाः भावविभोराः अभवन्। तदनन्तरं छात्रैः जाट-जतिन, सामा-चकेवा, झिझिया, कजरी इत्यादीनि पारम्परिक-लोकनृत्यानि मनोहररूपेण प्रस्तुतानि। एताभिः प्रस्तुतिभिः बिहारस्य समृद्धा लोकसंस्कृतिः सजीवरूपेण प्रकटिता।कार्यक्रमस्य अन्ते अतिथयः विद्यार्थिनां उज्ज्वल- भविष्यस्य कामनां कृत्वा विद्यालय-परिवारं सफलस्य आयोजनस्य कृते अभिनन्दितवन्तः। कार्यक्रमस्य समापनं धन्यवाद-ज्ञापनेन राष्ट्रगानेन च अभवत्।

# मण्डी जनपदे वित्तीय-अनियमिततायाः कारणात् सम्पूर्णः पञ्चायतः निलम्बितः

**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशे पञ्चायतानां कार्यकालसमाप्तेः केवलं चत्वारि दिनानि पूर्वं मण्डी-जनपदस्य सुधराणी पञ्चायतस्य सर्वे जनप्रतिनिधयः निलम्बिताः (Suspended) सन्ति। मण्डलपञ्चायताधिकारिणा विकासकार्येषु गभीराः अनियमितताः दृष्ट्वा एषा कार्यविधिः कृता।

## निलम्बिताः जनप्रतिनिधयः

पञ्चायतप्रधानः केशवरामः, उपप्रधानः सन्तरामः, वॉर्ड-सदस्याः तेजी देवी, ऋषिः, सुषमा देवी च पदात् निष्कासिताः। अधुना पञ्चायतस्य कार्यभारः सचिवेन द्रष्टव्यः इति आदेशः दत्तः।

## कार्यविधेः कारणम्:-

**मिथ्याकार्यम्-** सामुदायिक-पाकशालायाः निर्माणं, मार्गनिर्माणं, शौचालयनिर्माणं च केवलं पत्रेषु (on paper) एव कृतं इति दर्शितम्।

**वित्तीय-अनियमितता-** अन्वेषणे ज्ञातं यत् धनस्य आबंटनं (Payment) तु कृतं, परन्तु धरातले किमपि कार्यं न सञ्जातम्।

**दीर्घकालीन-** अन्वेषणम्- चुन्नीलालः नामकस्य व्यक्तेः उपालम्भेन आरब्धा एषा अन्वेषणप्रक्रिया सार्ध- एकवर्षं (1.5 years) यावत् प्रचलिता।

# महर्षि महेश योगी वैदिकविश्वविद्यालये धर्मगुरु-जीविका-परामर्शः

**ब्रह्मस्थान-करौन्दी,कटनी, मध्यप्रदेशः**

महर्षि महेश योगी वैदिकविश्वविद्यालयस्य आदरणीयकुलगुरोः संरक्षणे मार्गदर्शने च 27.01.2026 तमे दिनाङ्के अपराह्ने 3:00 वादनात् आरभ्य वेदविभागेन एकदिवसीयः “धर्मगुरु जीविकापरामर्श” इति कार्यक्रमः सफलतया आयोजितः अभवत्। अस्य कार्यक्रमस्य मुख्योद्देश्यः वेदाध्ययनसम्बद्धानां छात्राणां शोधार्थिनां च कृते धर्मगुरुरूपेण उपलब्धानां जीविकासम्भावनानां, तेषां सामाजिकव्यावहारिककर्तव्यानां, तथा आधुनिककाले धर्मस्य शिक्षायाश्च भूमिकाया विषये सम्यक् मार्गदर्शनं प्रदानं कर्तुमासीत्। अस्मिन् कार्यक्रमे शैक्षिक-आध्यात्मिक-व्यावसायिकदृष्टीनां सम्यक् समन्वयः दृष्टिगोचरः अभवत्।कार्यक्रमः उद्घाटनसत्रम्, प्रथमं तकनीकीसत्रम्, द्वितीयं तकनीकीसत्रं तथा समापनसत्रमिति चतुर्षु सत्रेषु विभक्तः आसीत्। उद्घाटनसत्रे वैदिकगुरुपूजनं मङ्गलाचरणं च सम्पन्नम्। तदनन्तरं श्रीबृजेशकुमारमिश्रमहोदयेन समागतानां अतिथीनां परिचयः, स्वागतं सम्मानं च कारितम्। ततः डॉ. आलोकचन्द्रपरिडामहोदयेन कार्यक्रमस्य परिचयः उद्देश्यम् च स्पष्टतया प्रतिपादितम्।

कार्यक्रमस्य मुख्यअतिथिरूपेण श्रीअरविन्दसिंहवर्यः, (प्रभारी,महर्षि वेदविज्ञानविद्यापीठम्)इत्यस्य गरिमामयी उपस्थितिः आसीत्। तेन वेदविज्ञानस्य समकालीनप्रासंगिकतां निरूपयन् उक्तं यत् अद्यतनपरिवर्तिते सामाजिकपरिवेशे धर्मगुरोः भूमिका केवलं कर्मकाण्डपर्यन्तं सीमिता नास्ति, अपि तु नैतिकनेतृत्वे, मूल्याधारितशिक्षायां, सामाजिकसमरसतायां, युवानां चरित्रनिर्माणे च तस्य महत्त्वपूर्णम् योगदानम् अस्ति। तेन विद्यार्थिनः वेदाध्ययनं आधुनिकसन्दर्भैः सह संयोज्य समाजोपयोगि कर्तुं प्रेरिताः।कार्यक्रमे सारस्वतअतिथिरूपेण भारतीयसेनायां कार्यं कृतवान् कैप्टन वीरेन्द्रचौबेमहोदयः विशेषतया उपस्थितः आसीत्। तेन स्वानुभवाधारीकृत्य उक्तं यत् भारतीयसेनायां धर्मगुरोः भूमिका सैनिकानां मनोबलं सुदृढं कर्तुं, मानसिकचिन्तां न्यूनं कर्तुं, कठिनपरिस्थितिषु नैतिकसंबलनं दातुं च भवति। अनुशासिते वातावरणे वेदेषु निहिताः भारतीयसांस्कृतिकमूल्याः सैनिकानां साहस-धैर्य-कर्तव्यनिष्ठां वर्धयन्ति इति तेन प्रतिपादितम्।



कार्यक्रमस्य अध्यक्षता माननीयः कुलगुरुः प्रो. प्रमोदकुमारवर्मामहोदयः कृतवान्। स्वीयाध्यक्षीयोद्बोधने तेन वेद-यज्ञानुष्ठानविभागेन आयोजितस्य एतादृशस्य कैरियरकाउन्सलिंगकार्यक्रमस्य प्रशंसा कृता तथा च उक्तं यत् विद्यार्थिनां कृते शैक्षणिकज्ञानेन सह व्यावहारिकजीवनस्य जीविकादिशायाश्च मार्गदर्शनम् अत्यावश्यकम्। वेदशिक्षाम् आधुनिकशिक्षाप्रणाल्या सह संयोज्य जीविकोन्मुखीं समाजोपयोगिनीं च कर्तुं तेन बलं दत्तम्। अनुशासनं, निरन्तराध्ययनं, सेवाभावं च अनुसृत्य अग्रे गन्तव्यम् इति सन्देशोऽपि प्रदत्तः।

द्वितीये तकनीकीसत्रे कार्यक्रमस्य मुख्यवक्ता श्रीहरेंद्रसिंहपरमारमहोदयः धर्मगुरुरूपेण जीविकानिर्माणस्य विस्तृतसम्भावनाः विषये सारगर्भितं व्याख्यानं दत्तवान्। तेन वेद-उपनिषद्-स्मृतिग्रन्थ-भारतीयदर्शनाध्ययनेन सह संचारकौशलं, परामर्शक्षमता, मनोविज्ञानज्ञानं, समकालीनसामाजिकविषयानां बोधः च आवश्यकः इति प्रतिपादितम्। तस्य मते अद्य धर्मगुरवः केवलं धार्मिकानुष्ठानानां मार्गदर्शकाः न सन्ति, अपि तु समाजस्य नैतिकपथप्रदर्शकाः, परामर्शदातारः, प्रेरकव्यक्तित्वानि च भवन्ति। अस्मिन् सत्रे सत्राध्यक्षः प्रो. मानवेन्द्रपाण्डेयमहोदयः आसीत्, डॉ. चन्द्रशेखरमिश्रवर्येण कार्तज्ञं प्रोक्तं मञ्चसञ्चालनं च श्रीबृजेशकुमारमिश्रमहोदयेन कृतम्।

तृतीये तकनीकीसत्रे जिज्ञासासमाधानं च इति विषयम् आधारीकृत्य भारतीयसेनायां धर्मगुरुरूपेण कार्यरताः श्रीसुनीलतिवारीमहोदयः, श्रीजलजशर्मावर्यः इति महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य शिष्यौ स्वानुभवान् प्रकटीतवन्तौ। श्रीसंजयरथमहोदयः स्वीय अनुभवकथनावसरे स्वजीवनसंघर्षः, चयनप्रक्रिया, प्रशिक्षणानुभवः, सेवाकालीनाः सङ्घर्षमयक्षणानि उपलब्धयश्च उक्तवान्। शुक्लयजुर्वेदस्थराष्ट्रसूक्तस्य विषये अपि प्रोक्तम्। तस्याभितं यत् – “धर्मगुरुः भवितव्यः इति चिन्तनम् उत्तमं परन्तु धर्मगुरु भूत्वा स्थातव्यः इति उत्कृष्टचिन्तनम्”। रथमहोदयस्य अनुभवाः विद्यार्थिनां कृते अत्यन्तं प्रेरणादायकाः अभवन्, येन वेदाध्ययनात् प्राप्तं ज्ञानं राष्ट्रसेवासु अपि सार्थकरूपेण उपयुज्यते इति स्पष्टम् अभवत्।अस्मिन् कार्यक्रमे प्रश्नोत्तरसत्रमपि आयोजितम्, यत्र प्रतिभागिभिः धर्मगुरुरूपेण जीविकोरावसराः, प्रशिक्षणप्रक्रिया, चयनमानदण्डाः, आयस्रोतांसि, सामाजिकप्रतिष्ठा, भविष्यसम्भावनाः इत्यादिविषयेषु प्रश्नाः पृष्टाः। वक्तृभिः सर्वे प्रश्नाः सरलतया स्पष्टतया प्रेरणादायकरीत्या च उत्तरिताः। अस्य सत्रस्य सत्राध्यक्षः श्रीगिरिजाशंकरचौधरीमहोदयः आसीत्, मञ्चसञ्चालनं डॉ. खुशेन्द्रदेवचतुर्वेदीमहोदयेन कृतम्।

समापनसत्रे डॉ. आलोकचन्द्रपरिडामहोदयः सर्वान् अतिथीन् वक्तॄन् प्रतिभागिनः सहयोगिनश्च प्रति आभारं प्रकटितवान्। समग्रतया अयं कार्यक्रमः वेद-यज्ञानुष्ठानविभागस्य एकः सार्थकप्रयासः सिद्धः, येन विद्यार्थिनां कृते धर्मगुरुरूपेण जीविकानिर्माणे नूतना दृष्टिः, स्पष्टः मार्गः आत्मविश्वासश्च प्रदत्तः। अस्य कार्यक्रमस्य समन्वयकः प्रो. मानवेन्द्रपाण्डेयः, संयोजकः डॉ. आलोकचन्द्रपरिडा, सहसंयोजकाः डॉ. चन्द्रशेखरमिश्रः, श्रीध्रुवकुमारपाठकः, श्रीसत्यनारायणशुक्लः, श्रीबृजेशकुमारमिश्रश्च आसन्। अस्मिन् एकदिवसीये कार्यक्रमे ऑफलाइन-ऑनलाइन माध्यमेन शताधिकाः प्रतिभागिनः सक्रियतया भागं गृहीतवन्तः।

# 'भक्ति-रत्नावली'-नामको ग्रन्थः असमीयाजनजीवनस्य प्राणस्वरूपः

साहित्यक्षेत्रे, धर्मीयक्षेत्रे च असमराज्यम् पूर्वतः हि अग्रेसरम् इति कथने नात्युक्तिः सर्वथा। असमीया- जातीय- जीवनस्य एवं संस्कृत्याः मूलाधारस्य निर्माता, असमीया- साहित्यस्य अन्यतमः स्रष्टा, नववैष्णवधर्मस्य एकान्तसाधकः, महापुरुष- शङ्करदेवेन सह समभावेन संलग्नः सज्जनः हि महापुरुषः माधवदेवः इति नाम्ना प्रसिद्धः, सुस्मरणीयश्च। महापुरुषः माधवदेवः बहुधा गीतम्, नाटकम्, भक्तितत्त्वमूलकम् इत्यादिविषये नानाग्रन्थान् विरचय्य असमीयासाहित्यम् इतोऽपि समृद्धं कृतवान्, अपिच साहित्यविकासाय एकां नूतनगतिं प्रदत्तवान् अस्ति। भारतस्य पूर्वाञ्चलप्रान्ते नववैष्णवधर्मस्य प्रचार-प्रसारकार्ये माधवदेवस्य अतिविशिष्टा भूमिका वरीवर्तते। महाभागस्य १४८९ तमे ख्रिष्टाब्दे, असमराज्यान्तर्गतस्य 'नारायणपुर' इति क्षेत्रस्य 'लेतेकुपुखुरीपार' इति स्थाने जन्म जातमासीत्। माधवदेवस्य पिता- गोविन्दगिरिः, माता- मनोरमा च इति नामधेयौ तस्य सुशीलौ पितरौ आस्ताम्। तस्य शैशवकालः हरिसिंहवरा गृहे, एवं घाघरमाजेः आश्रये अतिवाहितः। तदनन्तरं पित्रा सह वण्डुकास्थितं प्राक्तनं गृहं प्रत्यागतवान्। तत्र चतुर्दशवर्षीयस्य तस्य अध्ययनार्थं राजेन्द्राध्यापकस्य संस्कृतटोले नामपञ्जीकरणं जातम्। तस्यां शालायां सम्यक् अधीत्य सः स्वल्पसमयावधौ हि सुशिक्षाम् आसादितवान् आसीत्। यदा सः पितृविहीनः जातः, तदा मण्डुकां परित्यज्य माजुल्यभिमुखं स्थानान्तरितः अभवत्। तत्र आत्मीयस्य रामदासस्य साहाय्येन तस्य महापुरुष- शङ्करदेवेन सह परिचयः अभूत्। माधव- शङ्करयोः मध्ये देवीपूजा, बलिविधानम् इत्यादिविषयम् अनुसृत्य नानायुक्तितर्कादिकं समुत्पन्नम् आसीत्, परम् अन्ते माधवदेवः तद्विषये पराजितोऽभवत्। ततः सः शङ्करदेवस्य शरणापन्नः जातः, नववैष्णवधर्मस्य गुरुरूपेण तम् अङ्गीकृतवान्। तत्पश्चात् शङ्करदेवेन सहैव सः नववैष्णवधर्मविषयकः परमसाधकः प्रचारकश्च सञ्जातः। माधवदेवः प्रसिद्धः कविः, नाट्यकारः, गीतिकारः, धर्मप्रचारकः, सुगायकश्च आसीत्। तस्य महाभागस्य साहित्यक्षेत्रे एकं स्वकीयं वैशिष्ट्यं विराजमानम् अस्ति। तेन रचितेन नाट्यमाध्यमेन वैष्णवधर्मस्य महिमा प्रचारितः दृश्यते। तस्य मनः श्रीकृष्णस्य शिशुरूपं प्रति अत्यन्तम् आकृष्टम् आसीत्। तस्मात् तस्य गीतेषु विशेषतः बालरूपस्य श्रीकृष्णस्य नानाचौर्यकार्यम्, चाञ्चल्यम्, चातुर्यादिकं प्रकाशितम् अवलोक्यते। रामायणस्यापि सः आदिकाण्डस्य हि भाष्यं कृतवान् अस्ति। अनेन सः श्रीरामस्य बाल्यकालस्य नानाचरित्रं स्वेच्छया वर्णयितुम् अशक्नोत्। तस्य नाटकम्, गीतम् इत्यादिकं प्रायशः वात्सल्यरसेन परिपुष्टं वर्तते। तस्य गीतानि महाराष्ट्रस्य तुकारामस्य, एवम् उत्तरभारतस्य सुरदासस्य गीतैः सह तोलयितुं शक्यानि। तेन विरचितानि नाटकानि एवं सन्ति- 'चोरधरा', 'पिम्परा गुचोवा', 'भोजन विहार', भूमि लेटोवा', 'अर्जुन भञ्जन', तदुपरि 'रासझुमुरा', 'कोटोरा खेला', 'ब्रह्ममोहन', 'भूषण हरण' इत्यादीनि।






✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

**आख्यानमूलकरचनाः-**
रामायणम् आधृत्य 'आदिकाण्ड', भागवतञ्च अनुसृत्य 'राजसूयकाव्य' चेति।

**तत्त्वमूलकरचनाः-**
'जन्मरहस्य', 'भक्ति रत्नावली', 'नाम मालिका', 'नामघोषा' चेति। माधवदेवस्य सर्वोत्तमा, प्रसिद्धा च कृतिरेव 'नामघोषा' इति।

**गीतम्-**
माधवदेवस्य 'वरगीत', 'भटिमा' इत्यादिकी असमीया- गीतिसाहित्यस्य काचित् अमूल्यसम्पत्। 'वरगीत' इत्यस्य उदाहरणत्वेन चरणद्वयम् अत्र प्रस्तूयते-
"तेजरे कमलापति परभात निन्द।
तेरि चान्द मुख पेखो उठरे गोविन्द।।"
"याहेर चरन रेणु योगी नापाइ।
भकति बले ताको बन्धन कराइ।।" इति।

माधवदेवस्य तत्त्वमूलकग्रन्थः 'भक्ति-रत्नावली' इति। महापुरुषीय- वैष्णवधर्मे शङ्करदेवस्य 'कीर्तनघोषा', 'दशम' इति ग्रन्थद्वयस्य यत् स्थानम्, तदेव स्थानं माधवदेवस्य 'नामघोषा', 'भक्ति- रत्नावली' इति ग्रन्थद्वयस्य। एतद्ग्रन्थचतुष्टयं महापुरुषीय- वैष्णवधर्मस्य मुख्यस्तम्भभूतं वर्तते।
महापुरुष- माधवदेवेन विरचितस्य 'भक्ति-रत्नावली' ग्रन्थस्य मूलाधारभूतः- 'विष्णुपुरी' नामधेयस्य सन्यासिनः 'भक्तिरत्नावली' इति ग्रन्थः। अस्य मूलग्रन्थस्य ग्रन्थाकारस्य विष्णुपुरिणो विशेषपरिचयो नोपलभ्यते। केवलं स महाभागः आत्मानं 'तैरभक्त-सन्यासी' इति कथयति स्म। लोकविश्वासानुसारं विष्णुपुरिणः सम्पूर्णं नामासीत् 'विष्णुशर्मा' इति। तस्य महाभागस्य जन्म मिथिलायाः 'तिरौणी (तरौणी वा)' इतिनामके ग्रामे, ब्राह्मणपरिवारे च जातमासीत्। संस्कृतभाषायाम् एवं शास्त्रादिषु तस्य अनुपमेया पारदर्शिता आसीत्। तत्त्वज्ञानप्राप्तेः अनन्तरं सः सन्यासधर्मं स्वीकृतवान्। जनश्रुत्यनुसारं विष्णुपुरी प्रथमविवाहं विधाय, पश्चात् तत्पत्न्याम् अशिष्टाचरणं परिलक्ष्य च तां परित्यक्तवान्, तथा च गृहसंसारमोहादपि तस्य वैराग्यं जातम्। तदनन्तरं मिथिलायाः कस्मिंश्चित् शिवमन्दिरे निवसन् निरुपायत्वेन द्वितीयविवाहं सम्पादितवान्। तन्मन्दिरे यदा आसीत् तदा हि सः 'भक्ति- रत्नावली' ग्रन्थं विरचितवान् इति कथ्यते।
'भक्ति-रत्नावली' इति ग्रन्थः भक्तिविषयकः कश्चन सिद्धान्तग्रन्थः। 'रत्न' इत्युक्ते कश्चन मूल्यवान् पाषाणः। 'आवलिः', 'आवली' इति वा काचित् पङ्क्तिः, माला वा; अतः रत्नानां आवली- 'रत्नावली' इत्यत्र षष्ठीतत्पुरुष-समासः युज्यमानो वर्तते इति। अतः अस्मिन् ग्रन्थे भक्तितत्त्वविषयकः सारभागः सङ्गृहीतः वर्तते पद्यैः।
माधवदेवेन तद्ग्रन्थात् उद्धृतं चरणैकम् एवमस्ति-
"भक्ति-रत्नावली नामे नाइ पटन्तर।
परम अमूल्य रत्न भकत जनर।।" इति।
शङ्करदेवस्य प्रयाणस्य वर्षद्वयात् परं सोन्दरायां स्थिते भागीनेयस्य रामचरणठाकुरस्य गृहे उषित्वा माधवदेवेन 'भक्ति- रत्नावली'- ग्रन्थस्य अनूदितकार्यं सम्पादितम्। विष्णुपुरी संन्यासी श्रीमद्भागवतग्रन्थस्य भक्तिमूलकान् श्लोकान् अनुसृत्य आहृत्य १३ सङ्ख्यकेषु विभागेषु विभज्य मूलतः 'भक्ति- रत्नावली' ग्रन्थं विरचितवान् आसीत्। भागवतादतिरिच्य द्वित्रान् श्लोकान् 'हरिभक्तिसुधोदय' इति ग्रन्थात् उद्धृतवान् आसीत्, अन्याः द्वित्राः श्लोकाश्च स्वकीयाः। अस्मिन् 'भक्ति- रत्नावली' ग्रन्थे अन्तर्भूताः श्लोकाः- ११५ सङ्ख्यकाः। एतेषु १११ श्लोकाः मूलभागवतग्रन्थात् स्वीकृताः, स्वकीयाश्च ४ सङ्ख्यकाः स्युरिति। माधवदेवेन आहृत्य २९४ सङ्ख्यकैः पद्यैः स्वग्रन्थः सम्पूर्णः कृतो वर्तते।
माधवदेवः शङ्करदेवस्य सान्निध्ये आगमनान्तरम् एकनिष्ठतया धर्मचर्चायाम् आत्मनियोजनं कृतवान्। अनन्तरं कोचराज्ञः कामरूपम् आगत्य 'गनककुछि' इति स्थाने स्वकीयं गृहं निर्माय, तत्रैव उषित्वा शङ्करदेवेन सह धर्मचर्चायां निमग्नः जातः। तत्पश्चात् कानिचन दिनानि यावत् ताभ्यां तीर्थस्थानम् अटितम्। अन्ते १५९६ ख्रिष्टाब्दे भाद्रमासस्य शुक्लद्वितीयातिथौ सप्तोत्तरशते वयसि महापुरुषः माधवदेवः महाप्रयाणं सृतवान्। धन्यास्ते एतादृशाः सौभाग्यशालिनः महापुरुषाः, ये च सततं सुस्मरणीयाः सन्ति इति शम्।

## "लौकिकन्यायकोशः"
## "लाङ्गूलतरणन्यायः"

कस्यचित् शुनकस्य पुच्छं गृहीत्वा (धृत्वा) कोऽपि नदीं तुर्तुम् इच्छेत् चेत् कियत् मूर्खं कर्म स्यात्? एवं व्यर्थस्य कर्मणः उल्लेखाय न्यायस्य अस्य प्रयोगः क्रियते।
**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतम् करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। मुम्बापुर्याम् एकेन वाहन-चालकेन यात्री वञ्चिता। किन्तु चालकस्य आशयः यत् प्रयाण-मापकम् विना यात्रा मास्तु इति सूपदेशः अपि तेन दत्तः खलु।
नन्दिनी- विचित्रा घटना खलु! महाराष्ट्र-राज्ये वह्निशामकैः एकः घूकः रक्षितः। सः घूकः पतङ्ग-सूत्रे बद्धः भूतः।
काव्या- उत्तमम् कार्यम् कृतम् तैः। देहल्याः 'मेट्रो' स्थाने जनैः अपूर्वम् अनुशासनम् प्रदर्शितम्। तैः पङ्क्तौ स्थित्वा मार्गः रिक्तः कृतः।
नन्दिनी- एतत् दृश्यम् विरलम् एव। अन्ते, एकेन प्रोद्यमिना अमेरिक-देशस्य नागरिकता त्यक्ता। "तत् राष्ट्रम् मम हिताय न अस्ति" इति तेन विज्ञापितम्।
नन्दिनी- अद्यतनम् वार्ता-वृत्तम् अत्र एव समाप्यते।
काव्या- धन्यवादः। श्वः पुनः मेलिष्यामः।

## हास्यकणिका

**चतुरः शिष्यः (चतुर शिष्य)**
शिक्षकः- रे बालक! वदतु, 'भोजनं कृतवान्' इति वाक्यस्य भविष्यत्काले किं रूपं भविष्यति?
(शिक्षक: बालक! बताओ, 'भोजन कर लिया' इस वाक्य का भविष्यत्काल में क्या रूप होगा?)
शिष्यः- महोदय, अस्य भविष्यत्काले रूपं भविष्यति- 'हस्तं प्रक्षालयिष्यति'।



# भारतीयस्वतंत्रतान्दोलने नेताजीसुभाषचन्द्रबोसस्य योगदानम्

डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी,भागलपुर बिहारम्

भारतस्य स्वतंत्रतासंग्रामः केवलं राजनैतिकः संघर्षः न आसीत्, अपि तु अस्य स्वरूपं सामाजिकं, सांस्कृतिकं, वैचारिकं च आसीत्। अस्मिन् महायज्ञे असंख्याः देशभक्ताः स्वजीवनं राष्ट्रसेवायै समर्पितवन्तः। तेषु नेताजीसुभाषचन्द्रबोसमहाभागः एकः अद्वितीयः, विशिष्टः,क्रान्तिकारी नायकः च आसीत्। एषः स्वतंत्रतायाः प्राप्तिः केवलं अहिंसया न, अपि तु सशस्त्रसंघर्षेण, संगठनशक्त्या, आत्मबलिदानेन च साधनीया इति मन्यते स्म। तस्य सम्पूर्णं जीवनं भारतमातुः स्वतन्त्रतायै समर्पितम् आसीत्।

नेताजीसुभाषचन्द्रबोसः १८९७ तमे वर्षे जनवरीमासस्य त्रयोविंशतितमे दिने ओडिशाराज्यस्य कटकनगरे जन्म अलभत। एतस्य पिता जानकीनाथबोसः सुप्रसिद्धः अधिवक्ता आसीत्, माता प्रभावतीदेवी धार्मिकस्वभावा, संस्कारसम्पन्ना च आसीत्। मातृपितृसंस्कारैः सुभाषः बाल्यकालादेव सत्यनिष्ठः, अनुशासनप्रियः, राष्ट्रभक्तः च अभवत्। देशसेवा एव एतस्य जीवनलक्ष्यं जातम्। बाल्यावस्थायामेव एषः तीक्ष्णबुद्धियुक्तः, आत्मसम्मानयुक्तः, निर्भीकः च आसीत्। अयं कटकनगरे प्रारम्भिकशिक्षां प्राप्तवान्। तदनन्तरं कलकत्तानगरं गत्वा प्रेसिडेन्सीकॉलेजमध्ये अध्ययनं कृतवान्। तत्र ब्रिटिशप्राध्यापकस्य भारतीयछात्रान् प्रति अवमाननापूर्णव्यवहारं दृष्ट्वा एषः साहसपूर्वकं विरोधं कृतवान्। अस्मात् कारणात् एषः ततः निष्कासितः अभवत्। एषा घटना तस्य अन्यायविरोधीस्वभावस्य प्रथमं स्पष्टं प्रमाणम् आसीत्।तत्पश्चात् एषः स्कॉटिशचर्चमहाविद्यालये अध्ययनं कृत्वा दर्शनशास्त्रे विशेषरुचिं दर्शितवान्। वेदान्तदर्शनं, गीता, उपनिषदः च एतस्य चिन्तने गम्भीरतां समाविष्टवन्तः। उच्चशिक्षार्थं अयं इंग्लैण्डदेशं गतः। केम्ब्रिजविश्वविद्यालये अध्ययनं कृत्वा एषः भारतीयसिविलसेवापरीक्षायां उत्कृष्टं स्थानं प्राप्तवान्। सिविलसेवा एतस्मै उज्ज्वलं भविष्यं दातुं शक्नोति स्म, तथापि एषः ब्रिटिशशासनस्य अधीनत्वेन कार्यं कर्तुं न इच्छति स्म। राष्ट्रसेवा एव एतस्य जीवनस्य परमं लक्ष्यम् आसीत्। अतः सः स्वेच्छया सिविलसेवां परित्यज्य भारतं प्रत्यागतः। एषः त्यागः एतस्य राष्ट्रप्रेम्णः अद्वितीयम् उदाहरणम् अस्ति। एषः भारतीयराष्ट्रियकांग्रेसदलस्य सक्रियः सदस्यः अभवत्। महात्मागान्धिनः नेतृत्वे एषः प्रारम्भिककाले कार्यं कृतवान्। चित्तरंजनदासः एतस्य राजनैतिकगुरुः आसीत्। दासमहोदयस्य सान्निध्ये अयं प्रशासनकौशलस्य, जनसेवाभावनायाः, संगठनक्षमतायाः च विकासे स्वयोगदानम् अयच्छत्। ब्रिटिशसर्वकारः सुभाषचन्द्रबोसस्य उग्रराष्ट्रवादीविचारान् असहिष्णुतादृष्ट्या पश्यन् एतं पुनःपुनः कारागारदण्डेन दण्डितवान् । दीर्घकालं यावत् कारागृहे स्थितः सन् अपि सः शारीरिककष्टैः विचलितो न अभवत्।









कारागारे एषः निरन्तरं अध्ययनं, चिन्तनं, लेखनं च अकरोत्। राष्ट्रस्य भविष्यविषये एतस्य चिन्तनं अधिकं सुदृढं, परिपक्वं च अभवत्।

1938तमे वर्षे हरिपुरनगरे आयोजिते कांग्रेसदलस्य अधिवेशने अयं अध्यक्षपदे निर्वाचितः जातः। एतस्य अध्यक्षतायां औद्योगिकीकरणं, योजनाबद्धविकासः, स्वावलम्बनं च मुख्यविषयाः आसन्।1939 तमे वर्षे कांग्रेसदलस्य त्रिपुराराज्यस्य अधिवेशने अयं पुनः अध्यक्षः निर्वाचितः अभवत्। परन्तु एतस्य क्रान्तिकारीविचारः महात्मागान्धिनः अहिंसावादीनीतिभिः सह समन्वितः न आसीत्। अयं मन्यते स्म यत् ब्रिटिशसाम्राज्यं केवलं सशक्तप्रतिरोधेन एव भारतदेशं त्यक्ष्यति। एतेषां मतभेदानां परिणामस्वरूपं एषः कांग्रेसदलं त्यक्त्वा "फ़ॉरवर्डब्लॉक" इति नूतनराजनैतिकदलस्य स्थापनां कृतवान् । ब्रिटिशसर्वकारेण सुभाषचन्द्रबोसमहोदयः पुनः कारागारे स्थापितः। तथापि 1941तमे वर्षे अयं अद्भुतसाहसेन आरक्षकव्यूहस्य भेदनं कृत्वा गुप्तरूपेण भारतदेशात् पलायितवान्। अफगानिस्तानमार्गेण एषः जर्मनीदेशं गतः। एषा घटना भारतीयस्वतंत्रतासंग्रामस्य इतिहासे अतीव प्रसिद्धा अस्ति। जर्मनीदेशात् जापानदेशं गत्वा सुभाषचन्द्रबोसः भारतस्य स्वतंत्रतायै अन्तरराष्ट्रियसमर्थनं संगृहीतवान्। एषः विदेशेषु प्रवासीभारतीयानां हृदयेषु राष्ट्रप्रेम्णः अग्निं प्रज्वालितवान्। एतस्य ओजस्वीवक्तृत्वं, दृढनिश्चयः, आत्मविश्वासः च विश्वनेतॄन् अपि प्रभावितवन्तः।

1943तमे वर्षे सुभाषचन्द्रबोसः सिंगापुरदेशे "आजादहिन्दसर्वकार" इति अस्थायी स्वतंत्रभारतीयसर्वकारस्य स्थापनाम् अकरोत् । एषः स्वयमेव राष्ट्राध्यक्षः, प्रधानमन्त्री, युद्धमन्त्री च अभवत्। एषःसर्वकारः भारतदेशस्य स्वतंत्रतायाः प्रतीकः आसीत्। भारतस्य स्वतंत्रतायां सुभाषचन्द्रबोसस्य सर्वाधिकं महत्त्वपूर्णं योगदानं "आजादहिन्दसेना" इत्यस्याः संगठनं आसीत्। "चलन्तु दिल्लीनगरं प्रति" इति घोषणया एषः भारतीयसैनिकान् प्रेरितवान्। एषः स्त्रीणां सक्रियता वर्धनाय "राणी-झाँसी-रेजिमेण्ट" इति स्त्रीसेनाम् अपि स्थापितवान्। एषा सेना भारतस्य सीमाप्रदेशेषु ब्रिटिशसैन्येन सह संघर्षं कृतवती।

यद्यपि आजादहिन्दसेना सैनिकदृष्ट्या पूर्णसफलतां न प्राप्तवती, तथापि तस्या प्रभावः अत्यन्तं व्यापकः आसीत् ।आजादहिन्दसेनायाः सैनिकानां न्यायप्रक्रियया सम्पूर्णभारतदेशे राष्ट्रभक्तेः ज्वाला प्रज्वलिता। ब्रिटिशसैन्येषु अपि असन्तोषः उत्पन्नः जातः। अनेन प्रकारेण सुभाषचन्द्रबोसस्य प्रयासाः भारतस्य स्वतंत्रताप्राप्तिं समीपं नीतवन्तः। यद्यपि सर्वे जानन्ति यत् 1945 तमे वर्षे ताइहोकुविमानदुर्घटनायां सुभाषचन्द्रबोसस्य मृत्युः अभवत् ,तथापि एषा घटना अद्यापि विवादास्पदा, रहस्यमयी च अस्ति। किन्तु शारीरिकरूपेण अनुपस्थितो भूत्वा अपि नेताजीमहोदयः भारतीयजनमानसे सदा जीवितः अस्ति।

सुभाषचन्द्रबोसः स्वावलम्बनं, राष्ट्रियैकताम् , अनुशासनं, बलिदानं च विशेषरूपेण प्रतिपादितवान्। एतस्य दृष्टौ राष्ट्रहितं सर्वोपरि आसीत्। व्यक्तिगतसुखं, पारिवारिकजीवनं च एतेन राष्ट्रसेवायै उत्सृष्टं कृतम् । भारतदेशस्य स्वतंत्रतायां सुभाषचन्द्रबोसस्य योगदानम् अमूल्यं, अद्वितीयम्, अविस्मरणीयं च अस्ति। एषः भारतीयस्वतंत्रतासंग्रामस्य क्रान्तिकारीचेतनायाः प्रतीकः आसीत्। एतस्य जीवनं अस्मान् शिक्षयति यत् स्वतंत्रता याचनया न लभ्यते , अपि तु अर्जनेन एव प्राप्यते ।अत्र वयं वक्तुं शक्नुमो यत् यदा यदा भारतदेशस्य स्वतन्त्रतान्दोलनस्य चर्चा भविष्यति तदा तदा जनाः नेताजीसुभाषचन्द्रबोसमहाभागस्य स्मरणं करिष्यन्ति एव। भारतीयस्वतंत्रतायाः इतिहासे एतेषां नाम स्वर्णाक्षरैः लिखितो भविष्यति। वयं एतं महापुरुषं प्रणामांजलिं समर्पयामः।

## हिमाचलदर्शनम्- हाटकोटीमन्दिरम्

हिमाचलप्रदेशस्य शिमलाजनपदे स्थितं हाटकोटी मन्दिरम् अति प्राचीनं पवित्रं च स्थानम् अस्ति। एतन्मन्दिरं देवी दुर्गायाः (महिषासुरमर्दिनी) स्वरूपाय समर्पितम् अस्ति।

***अस्य मन्दिरस्य विषये संक्षिप्तः संस्कृतलेखः अधः दत्तः अस्ति-***

**हाटकोटी मन्दिरम्: एकः परिचयः** स्थानम् एतत् मन्दिरं शिमलातः प्रायः १०० कि.मी. दूरे पब्बर-नद्याः तटे स्थितम् अस्ति। एषः प्रदेशः 'हाटकोटी' इति नाम्ना प्रसिद्धः।

**ऐतिहासिकं पौराणिकं च महत्त्वम्:** हाटकोटी मन्दिरं शिखरशैल्यां निर्मितम् अस्ति। तत्र देवी महिषासुरमर्दिनी अष्टभुजा रूपेण विराजते। इयं प्रतिमा कांस्यधातुना निर्मिता अस्ति।

**पाण्डवकालः:** जनश्रुतिः अस्ति यत् पाण्डवाः स्वस्य अज्ञातवासस्य कश्चित् कालं अत्र व्यतीतवन्तः। मन्दिरस्य प्राङ्गणे विशालं लौहपात्रं (चरुः) अपि अस्ति, यत् पाण्डवैः सह सम्बद्धम् इति मन्यते।

**शंकराचार्यः:** कतिपय विद्वांसः कथयन्ति यत् जगद्गुरु आदि शंकराचार्यः अपि अस्य मन्दिरस्य जीर्णोद्धारं कृतवान्।

**मन्दिरस्य वैशिष्ट्यम्:** अस्य मन्दिरस्य गर्भगृहे स्थिता देवी अत्यन्तं तेजस्विनी अस्ति। मन्दिरस्य पार्श्वे भगवतः शिवस्य अपि एकं प्राचीनं मन्दिरं वर्तते। अत्र नवरात्रिकाले विशालः उत्सवः भवति, यत्र सहस्रशः भक्ताः दर्शनार्थं आगच्छन्ति।



